ISSN: 2349 - 4891

International
Journal of Recent Research and Applied Studies
(Multidisciplinary Open Access Refereed e-Journal)

# श्रीमद्रामायणे मुनीनां लोकानुग्रहः लोकहितैषित्वं परिशीलनम्

Dr. SK. Nagamastanvali
Guest Faculty
Dept. of Puranetihasa
National Sanskrit University
Tirupati
Cell: 9492606567

संस्कृतं नाम दैवीवाक् इतीयं भाषा प्रख्यातिं गता। भारतीयानां वैदिकानामपि सहस्राणां भाषाणामियं मातृस्थानीया विराजते। अस्याः वाङ्मयं समग्रेऽपि प्रपञ्चे प्रप्रथमाविर्भूतम्। अस्याः इदं वाङ्मयं वेदशास्त्र-इतिहास-पुराण-काव्यरूपेषु विलसत् प्राचीनतमं श्रेष्ठतममिति बहुभिर्बुधैः भारतीयैर्विदेशीयैश्च प्रस्तुतम्। अपरमिदं भारतीयार्थवाङ्मयं सर्वं संस्कृतवाङ्मयनाम्नैव व्यवह्रियते। इदं वाङ्मयं भारतीयानाम् अमू[illegible]निधिरेव।

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थीतधीर्मुनिरुच्यते॥1**

**मुनयः सर्वे तपोधनाः।**

**तपः त्रिविधम् – 1)शारीरम् 2)वाचिकम् 3)मानसिकं चेति।**

**त्रिविधस्य तपसः लक्षणान्यपि गीतायां प्रोक्तानि।**

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥**
**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यासनं चैव वाङ्मयं तप उच्यते॥**
**मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**

ISSN: 2349 - 4891

International
Journal of Recent Research and Applied Studies
(Multidisciplinary Open Access Refereed e-Journal)

**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥2**

मुनीनां तपोवननिवासः –

प्रायशो मुनयो जनपदेभ्यः पुरेभ्योऽपि दूरे अरण्येषु प्रशान्तेषु आश्रमेषु तपोदीक्षामवलम्बन्ते स्म। ते चाश्रमाः परमपवित्राः मनोहराः सर्वलोकशुभङ्कराश्चासन्। तष्वाश्रमेषु तपोयज्ञदीक्षितः मुनयः प्रायशः प्रशान्तगार्हस्थ्यजीवनाः न्यवसन्। कदाचित्केन ते राक्षसपीडादिकारणैः आश्रमं त्यक्त्वा अन्यत्र अपराश्रम निर्माणं कृत्वा निवसन्ति स्म। केषुचिदाश्रमेषु प्रवेष्टुमपि राक्षसा भीता भवन्ति स्म।

**विश्वामित्राश्रमः/सिद्धाश्रमः –**

विश्वामित्रः श्रीरामलक्षणौ आत्मना क्रियमाणस्य यज्ञस्य रक्षणार्थं नयति स्म। मार्गमध्ये रामः कंश्चन आश्रमं दृष्टवान्। तत्र पर्वतस्थानतिदूरे वृक्षषण्डं मेघसङ्काशमासीत्। तन्नितरां दर्शनीयं नानामृगाकीर्णं विविधपक्षीणां रावैः सुनादं, मनोभिरामं च आसीत्। मुग्धो रामः सर्वं मे शंस भगवन् कस्याश्रमपदन्त्वियम् इति विश्वामित्रं बालसहजेन कुदूहलेनापृच्छत्। विश्वामित्रः तदाश्रममाहात्म्यं राममित्थं श्रावितवान् – इतः पूर्वमत्र महाविष्णुना तपः आचरितम्। तदा अग्निमुखाः देवतास्तमुपगम्य बलेर्निग्रहणार्थं वामनत्वं गत्वा कल्याणकार्यं कुरु इति प्रार्थयामासुः। पुनः काश्यपो महर्षिः पत्न्या अदित्या सह वर्षसहस्रकं व्रजं समाप्य **पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ।3** इति ... विष्णुं वरमयाचत। तस्य च मनोरथः अत्र सि... विख्यातः।

**तपश्चरणयोगार्थमुवास सुमहातपाः।**

**एष पूर्वाश्रमो राम वामनस्य महात्मनः॥**

**सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महतपाः॥ 4**

वामने भक्त्या मयैष आश्रमः आश्रितः। हे राम, अयमाश्रमः न केवलं मम किन्तु भवतोऽपि भवितुमर्हति इति हर्षपुलकितमात्रः विश्वामित्रः उवाच।

**तेनैष पूर्वमाक्रान्त आश्रमः श्रमनाशनः।**

**मयापि भक्त्या तस्यैष वामनस्योपभुज्यते॥5**

**वसिष्ठाश्रमः –**

वसिष्ठो महामुनिः इक्ष्वाकूणां पुरोहितः। सः रजनगर्यामयोध्यायां निवसति स्म। तत्पूर्वं सः वने आश्रमे एव न्यवसत्। स चाश्रमः विविधवृक्षसमाकूलः, विविधमृगसमाकीर्णः, प्रशान्तहरिणसमूहः, सिद्धचारणै- देवदानवगन्धर्वैः किन्नरैः द्विजसङ्घैः ब्रह्मदेवर्षिगणैः वालखिल्यैः वैखानसैश्च संसेवितः आसीत्। इत्थं च स आश्रमः ब्रह्मलोक इवासीत्।

**गौतमाश्रमः –**

गौतमीमहर्षिः अहल्यापतिः। शतानन्दमहर्षेः जनकश्च तस्याश्रमः दिव्यः सुरगणसम्भावितश्चासीत्।

**आश्रमो दिव्यसंकाशः सुरैरपि सुपूचितः।6**

सः पत्न्या सह तत्र चिरकालं महत्तपः कृतवान्। किन्तु इन्द्रस्य दुरागतेन क्रुद्धः सः इन्द्रमहल्यां च शप्त्वा आश्रमं त्यक्त्वा हिमालये तपः करणमुद्युक्तवान्। कालान्तरे रामः विश्वामित्रसहितः तत्रागतः। तदा रम्यतमं पुरतनं निर्जनं तमाश्रमं दृष्ट्वा आश्चर्यचकितवन्तः। तदा विश्वामित्रमपृच्छत्। तदा स मुनिः रामाय आश्रमवृत्तान्तं श्रावितवान्। तदन्तरे रामस्यागमनेन अहल्या शापाद्विमुक्ता जाता। तदा गौतमः आश्रमं पुनरागत्य अहल्या सहितः सन् –

ISSN: 2349 - 4891
International
Journal of Recent Research and Applied Studies
(Multidisciplinary Open Access Refereed e-Journal)

**रामं संपूज्य विधिवत् तपस्तेपे महातपाः।7**

**भरद्वाजाश्रमः –**

भरद्वाजो महामुनिः प्रयागे पुण्ये रमणीये गङ्गायमुनयोः सङ्गमप्रदेशे सशिष्यः संश्रितव्रतो न्यवसत्। सीतारामलक्षणाः वनं प्रविश्य भरद्वाजस्यैव श्रमं गतवन्तः। सीतारामलक्षणाः तं मुनिमभिवाद्य तेन समर्पितमाथिथ्यं स्वीकृत्य चित्रकूटो पर्वतः प्रशान्तवनवासायोत्तमस्थानमिति तन्मुखाज्ज्ञात्वा तत्र प्रस्थिताः। कतिपयदिनानन्तरं भरतः रामम् नेतुं ससैन्यं तत्र भरद्वाजाश्रमविधीनामाज्ञाभङ्गो भवेदिति न प्रविष्टः।
लोकमानवहिताय च लोककल्याणार्थं मुनयः सर्वदा श्रमं कृतवन्तः। त्रेतायुगायां अनेकानेकाश्रमाः सन्ति। ते एवं वाल्मीकेराश्रमः, अत्रेराश्रमः च दण्डकारण्याश्रमाः, शरभङ्श्रमः, सुतीक्ष्णाश्रमः, अगस्त्यभ्रातुराश्रमः, अगस्त्याश्रमः, माण्डकर्ण्याश्रमः इत्यादीनां आश्रमाः महर्षिभिः निर्मिताः।

**वसिष्ठमहामुनेः पौरोहित्यम् –**

**राजा राष्ट्रकृतं पापं राजपापं पुरोहितः।**
**भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुर्व्रजेत्॥**
**सेवाधर्मः परमगहनो योगिनामप्यगम्यः।**

जनहितैषिभिः राजवंशहितैषिभिश्च तैः सदा निराडम्बरेणैव जीवतं यापितवन्तः। वसिष्ठमहर्षिः दशरयमहाराजस्य पुरोहितः। सः चिरम् अयोध्यापालकानाम् इक्ष्वाकुणां कुलपुरोहितः आसीत्।

**यज्ञौ मे क्रियतां ब्रह्मन् यथोक्तं मुनिपुङ्गवः।**
**यथा न विघ्नः क्रियते यज्ञाङ्गेषु विधीयताम्॥**

ISSN: 2349 - 4891
International
Journal of Recent Research and Applied Studies
(Multidisciplinary Open Access Refereed e-Journal)

**वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः।8**

सोऽपि महर्षिः तथाऽस्त्विवति अन्वमोदत –

पुण्यकार्यावसरे धार्मिका एव आह्वानमर्हन्तीति पुरोहितस्य अनुग्रः अत्र प्रशंसनीय।

**ब्रह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चैव सहस्रशः**

**समानयस्व सकृत्य सर्वदेशेषु मानवान्।9**

इत्थं च मन्त्रिणमपि पुरोहितः कार्यावसरे आदेष्टुमहीतीति ज्ञायते। एवं सदा मुनयः पुरहिताय च जनहिताय तथा लोककल्याणार्थं अहर्निशं निर्मलविशिष्टव्यक्तिरूपैः ते अस्मान् आशीर्वचनं प्रदास्यन्तीति ममाभिप्रायम् अस्मिन् शोधपत्रे विवरणं प्रकटयित्वा दत्वा मुनि जीवनमेव सम्प्रति आधुनिककाले आवश्यकमिति उक्त्वा एतत् शोधपत्रं सर्वेषां उपयुज्यं भविष्यतीति सविनयं प्रकटयन्नस्मि।

ISSN: 2349 - 4891
International
Journal of Recent Research and Applied Studies
(Multidisciplinary Open Access Refereed e-Journal)

References –

1. भगवद्गीता साङ्ख्ययोगः – 56
2. भगवद्गीता श्रद्धात्रयविभागयोगः – 94-96
3. बालकाण्डः – 29.3
4. बालकाण्डः – 29.3
5. बालकाण्डः – 29.29
6. बालकाण्डः – 48.95
7. बालकाण्डः – 50.29
8. बालकाण्डः – 13.03.04
9. बालकाण्डः – 13.19